यजुर्वेद-संस्कारभाष्यकर्त्रा वेदान्तसूत्रेषु वैदिकभाष्य-निर्मात्रा भगवद्गीतासु भवगद्भाष्यरचयित्रा

काशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन

स्वामिश्रीभवदाचार्ययतिराजेन विरचितेन

श्री मुण्डकोपनिषत्संस्कारभाष्येण

संवलिता

मुण्डकोपनिषद्

प्रथममुण्डके प्रथमः खण्डः

मुण्डकाख्येन केनचिज्ज्ञानिना प्रोक्ततोपनिषन्मुण्डकोपनिषदिति प्रख्याता। न हि तेन प्रोक्तमित्यण् शङ्कनीयः। व्युत्पत्तिमात्रमेतत्। तस्याः प्रारम्भ आख्यायिकया भवति। सा चेयम्—

ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता। स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥ १ ॥

देवानां मध्ये कश्चिद्ब्रह्मा नाम प्रथमो देवः संबभूवोत्पन्नः। स विश्वस्य जगतः कर्तेव भुवनस्य गोप्तेवासीत्। जगतः कर्तृत्वं चेश्वरस्यैव प्रसिद्धं न तु ब्रह्मदेवस्य। कथं तर्हि विश्वस्य कर्ता भर्ता ब्रह्मा बभूवेति? कर्तेव गोप्तेवासीदिति तात्पर्यम्। कर्तेति गोप्तेति कथनेन तस्य माहात्म्यातिशयो व्यज्यते। पौराणिको ब्रह्मर्षिः केवलं जगत्कर्तासीन्न तु गोप्तापि। स सर्वविद्याप्रतिष्ठां सर्वासु विद्यासु प्रतिष्ठा यस्यास्ताम्। क्वचित्सर्वविद्यावरिष्ठामित्यपि पाठः सर्वविद्यासु वरिष्ठां श्रेष्ठामिति तदर्थः। स्वस्य ज्येष्ठपुत्रायाथर्वाय प्राह प्रोक्तवान् अध्यापयामासेतिभावः। अथर्वायेति प्रयोग औपनिषदः ॥ ११ ॥

अथर्वणे यां प्रवदेत ब्रह्माथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम्। स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोऽङ्गिरसे परावराम् ॥२॥

ब्रह्मदेवो यां विद्यामथर्वणे प्रवदेत प्रावदत्तामेव पुराथर्वाङ्गिरेङ्गिर्नाम्ने उवाच प्रोक्तवान्। सोऽङ्गीर्भारद्वाजाय भरद्वाजगोत्रोत्पन्नाय नाम्ना सत्यवहाय प्राह। भारद्वाजश्च तामङ्गिरसे प्राह। विद्यां विशिनष्टि परावरामिति। परस्मात्परस्मादवरेण प्राप्ताम् ॥ २ ॥

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ। कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ॥ ३ ॥

कश्चन महाशालो महाकुलोत्पन्नः शौनकनामर्षिर्ज्ञानिपिपासुर्वा विधिवदुपसन्नः समिदादिकमाहृत्योपगतोऽङ्गिरसम्। पप्रच्छ च भगवो भगवन् कस्मिन्नु विज्ञाते सर्वमिदं जगद्विज्ञातं भवतीति। जगतो विजिज्ञासा जाता। जगत् कुतो जातं केन जनितं, केन च साधनेन जनितं, कस्मै प्रयोजनाय जनितमित्यादीन्बहून् प्रश्नान् मनसि संनिधाय तेन पृष्टं कस्मिन्विज्ञाते सर्वमिदं विज्ञातं स्यादिति। शौनको नासीत्तीक्ष्णमतिः। यदि स तथा स्यान्न स्यात्तस्यैतादृशः प्रश्नस्य जिज्ञासा। प्रश्ने नौचित्यप्रदर्शनावसरं पश्यामः। कथमिदं सर्वं विज्ञातं भवतीत्येव प्रष्टव्ये कस्मिन्नु विज्ञात इत्यधिकः प्रश्नः। शौनकेन कुत्रापि श्रुतं भवेद्यस्मिन्कस्मिन्वा विज्ञाते जगदिदं सर्वं विज्ञातं भवतीति, तस्मादेव कस्मिन्नु विज्ञात इत्यप्याह। अत्र सर्वस्यास्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केनापि विज्ञातेन सह कोपि सम्बन्धः शोधनीयः। यस्य विज्ञानेन सर्वस्यास्य विज्ञानं भवति तयोः कश्चन पारस्परिकः सम्बन्धोन्वेषणीयः। न ह्यन्यस्य विज्ञानेनान्यस्य ज्ञानं भवति। सुवर्णविज्ञानेन न स्याद् ज्ञानं गङ्गायाः। न वा घटविज्ञानेन पटविज्ञानं स्यात्। एवं च ज्ञेयज्ञापकयोः साधर्म्यं स्थापितं भवति। काञ्चनावगतेरेव काञ्चनभूषणादेरवगतिर्भवति। किं च सर्वमिदमिति कथनेन दृश्यं जगदेव गृहीतं स्यात्। तर्हि जगद्विज्ञाने कश्चिद्धेतुर्वक्तव्यः। स तु नैव दृश्यते। तर्हि प्रश्नस्यायमाशयः, यदिदं सर्वं विज्ञातं भवति जगत् तत्कस्मिन्नु विज्ञाते तत्त्वे तिष्ठतीति। अथवा कस्मिन्वस्तुनि विज्ञाते सर्वमिदं विज्ञातं स्यात्। एतेन कार्यस्य यत्कारणं तस्य गवेषणेति प्रतीयते ॥ ३ ॥

तस्मै स हो वाच द्वे विद्ये वेदितव्ये इति ह स्म। यद्ब्रह्मविदो विदन्ति परा चै वापरा च ॥ ४ ॥

सोङ्गिरास्तस्मै शौनकायोवाच। द्वे एव विद्ये वेदनीये इति ह स्म इत्येव विद्वत्सु प्रख्यातम्। के ते द्वे ? आह— परा चापरा चेत्येव। कुतो द्वे एव विद्ये वेदनीये तत्राह–यद्यस्मात् ब्रह्मविदो द्वे एव विदन्ति। ननु का विद्या वेदनीयेति नास्ति प्रश्नः। कस्मिन्नु विदिते सर्वमिदं विदितं भवतीत्येव प्रश्नः। कथं तर्हि आम्रान्पृष्टः कोविदारानाचष्ट इत्याख्यानकस्य स्मृत्यवसरः ? उच्यते। कस्मिन्नु विज्ञाते इति विज्ञानस्य प्रश्नः। विज्ञानं तु येन केनापि साधनेन जायते। साधनं त्वग्वेदादयः। ते चं विद्यारूपा एव। तत एवात्र विद्यानिरूपणम्। किं च कस्मिन्नु विज्ञाते सर्वमिदं विज्ञातं भवतीत्यत्र कारणकार्यगवेषणा। पूर्वं कारणगवेषणा। पश्चाच्च कार्यगवेषणा। पूर्वं ज्ञानमपेक्षितम्। सत्येव ज्ञाने वस्तुगवेषणाप्रवृत्तिः। न हि जडः पर्वतो जिज्ञासते कोहमिति कुतो वोत्पन्न इति केनोत्पादित इति। ततः पूर्वं सामान्यज्ञानम्। पश्चाज्ज्ञेये प्रवृत्तिः। ततः पश्चात्तज्ज्ञेयज्ञानम्। पराविद्याया मुख्यत्वात्तस्य पूर्वनिर्देशः। अपराज्ञानपूर्वकमेव पराज्ञानं गुणाय भवतीति पञ्चम्यां श्रुतौ पूर्वमपरानिर्देशः। आभ्यामेव सर्वमिदं विज्ञातं स्यादन्यदपि ॥ ४ ॥

परापरयोर्विद्ययोः स्वरूपमाह–

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति अथ परा यया तदक्षरमधिगम्यते ॥ ५ ॥

अपरायाः प्राथमिकत्वेन बाहुल्येन च प्रथमं तामेव परिचाययति। ऋग्वेदादयश्चत्वारो वेदाः। अङ्गानि च शिक्षाकल्पेत्यादीनि। कल्पो विनियोगबोधकः। अत्र कल्पशब्देन ब्राह्मणग्रन्थानामपि ग्रहणम्। तावत्कालं यावन्नासीद्ब्राह्मणग्रन्थानां निर्माणमिति तु नैव शक्यते स्थापयितुम्। कल्पोपि ब्राह्मणान्तर्गत एव। ज्योतिषं ज्यौतिषं ज्योतिर्विद्या। शिक्षाकल्पव्याकरणाद्यास्तु विद्यात्वेन प्रसिद्धा एव लोके। परमृग्वेदाद्या वेदत्वेनैव प्रसिद्धाः। कथं तर्हि अपराविद्याबोधनोपक्रमे ग्रन्थप्रकथनमिति। सत्यम्। बोध्यबोधकयोरैक्यादेवं कथनम्। बोधकत्वं हि वेदानाम्। अथवा वेदेषु विद्येतरत्किञ्चिदपि नास्तीति मत्वा तत्रापि विद्यात्वव्यवहारः। परा प्रकाश्यते–यया विद्यया तदक्षरमविनाशि ब्रह्माधिगम्यते प्राप्यते सा परेति। ननु नहि यया कयापि विद्यया ब्रह्मावाप्यते। नास्ति तत्र साधनलभ्यत्वमिति चेत्। सत्यम्। नहि विद्यया ब्रह्म लभ्यते। तर्हि कथमुक्तं यया तदक्षरमधिगम्यत इति ? अधिगतिरिह ज्ञानम्। यया ज्ञायत इत्यर्थः। ननु ज्ञायत इत्यस्य ज्ञानविषयो भवतीत्यर्थः। न हि तत्र ज्ञानविषयता। ज्ञानरूपं हि तत्। सत्यम्। यया कयापि रीत्या शिष्याय तत्तु बोधनीयमेव। नांगुलिनिर्देशः कर्तुं शक्यते। नांगुलिग्राह्यं दर्शयितुं शक्यते। यत्र नान्यत्साधनं तत्र शब्दब्रह्मैव शरणम् इति मत्वा यथाकथंचिदधिगम्यत इति समाधेयम् ॥ ५ ॥

तदक्षरस्य स्वरूपं निरूप्यते--

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ॥ ६ ॥

य ईदृग्रूपं तद्धीराः परिपश्यन्तीत्यन्वयः। कीदृग्रूपं तत् ? अद्रेश्यमदृश्यम्। चक्षुरिन्द्रियविषयता वारिता। अग्राह्यं न ग्रहीतुं योग्यम्। कर्मेन्द्रियाणां तत्र व्यापाराभावात्। कुत इन्द्रियाणामप्रवृत्तिस्तत्रेत्याह—अगोत्रम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशरीरम्। शरीराभावादेव तस्येन्द्रियाणामविषयत्वम्। अत एवावर्णम्। वर्णो नीलपीतादी रङ्गः। सति शरीरे रङ्गविवेचना। तदभावे तदभावः। पिष्टं पिनष्टि। अचक्षुःश्रोत्रमचक्षुरश्रोत्रम्। तदपाणिपादं तस्य न स्तः पाणी न च स्तः पादौ। अत एव तन्नित्यम्। इन्द्रियसमवायवाननित्यो दृष्टः। न च भौतिकेन्द्रियाणामियं कथा। ब्रह्मणस्तु सर्वमभौतिकमिति वाच्यम्। अभौतिकेन्द्रियगणस्य साध्यकोटिप्रविष्टत्वात्। यदि नित्योप्यनित्योपीन्द्रियगणस्तर्हि न स्यादत्र निषेधो नित्यस्य सत्त्वात्। नित्यानित्येतिद्विविधेन्द्रियाणां तत्रात्यन्ताभावप्रदर्शनार्थं विभुमिति। तद्विभ्वेव। न हि विभुपदार्थस्येन्द्रियादिमत्त्वं व्यवस्थापयितुं शक्यम्। विभुमित्यत्रानुस्वारश्रुतिर्भ्रमादेव। विभ्वर्थं विवृण्वत्याह श्रुतिः सर्वगतमिति। सर्वगतत्वे हेतुमाह सुसूक्ष्ममिति। इत्थंभूतं यत्तत्त्वं तदव्ययं व्ययरहितमविनाशीत्यर्थः। तच्च धीरा विद्वांसो भूतयोनिं सर्वेषां जन्यवस्तूनां योनिमादिकारणं परिपश्यन्ति निश्चिन्वन्ति। ननु कार्यकारणविरहितं हि ब्रह्म कथं तर्हि तस्य भूतयोनित्वमिति चेत्। जगज्जन्यत्वमतेगतिकोयं योनिवादः। अनया श्रुत्याक्षरब्रह्मस्वरूपं परिचायितं भवति। एवं चेदृशमक्षरं यया ज्ञायते सा हि परा विद्याध्यवसेयेति तात्पर्यम्॥ ६॥

यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्॥ ७॥

इयं श्रुतिः शाङ्करसम्प्रदायेत्र न दृश्यते। परया विद्ययानुभाव्यस्य ब्रह्मणो माहात्म्यमनुगीयते। जगति वर्तमानं किञ्चिदपि वस्तु यस्मात्परमपि नास्त्यपरमपि नास्ति। परत्वापरत्वनिषेधो जगद्ब्रह्मणोः शरीरशरीरिभावस्वीकारमन्तरेण न हि सार्थक्यं वहति। यस्मान्नाणीयः किञ्चित्न वा ज्यायः। सूक्ष्मदीर्घपदार्थयोर्निषेधः। अतिदुरूहत्वात्तस्य सौक्ष्म्यम्। गिरिगिरिनदीनदीपत्याद्यपेक्षयापि तस्य दीर्घत्वमेव। कश्चिदिति भ्रान्तः पाठः। दिवि वृक्ष इव स्तब्धः स्तब्धं तदेक एकं केवलं तिष्ठति। यथा वृक्ष आकाशे निस्सहायस्तिष्ठति तथैव ब्रह्मापि सहायनिरपेक्षं सर्वत्र तिष्ठति। ननु वृक्षो न निस्सहायः। पृथिव्यां तस्य मूलमिति पृथिव्येव साहाय्यं धत्ते। धत्तां नाम। उपरि तु निस्सहाय एव सः। तद्वदेव ब्रह्म सर्वत्र निस्सहायम्। स्तब्धं तिष्ठतीतिकथनेन जगद्व्यापारराहित्यं सूचयति। तेनेदृशेन पुरुषेण सर्वमिदं दृश्यमदृश्यं जगत्पूर्णम्॥ ७॥

ब्रह्मण उपादानत्वं निवेदयति—

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति। यथा सतः पुरुषात्केशलोमानि तथाक्षरात्सम्भवतीह विश्वम्॥ ८॥

यद्युंपरिवर्णितमेव ब्रह्मणः स्वरूपं तर्हि तस्माद्विश्वं कथमुत्पद्यत इति शङ्कां मनसिकृत्य सर्वज्ञा श्रुतिराह—ऊर्णनाभिर्लूताख्यः कीटविशेषः सर्वजनप्रसिद्धः। स यथा स्वयं सृजते स्वान्तःस्थिततन्तुं विस्तारयति यथा च गृह्णते स्वान्तरेव प्रवेशयति यथा चौषधयो वनस्पतयः पृथिव्यां सम्भवन्त्युत्पद्यन्ते यथा च सतो वर्तमानात्पुरुषात्केशा लोमानि च प्रभवन्ति तथैवाक्षरादविनाशाद्ब्रह्मणो विश्वं संभवतीति। अत्र दृष्टांतत्रयस्योपादानम्। तच्चात्र नानुकूल्यं सन्धत्ते। तथाहि ऊर्णनाभिर्भौतिको जन्तुः। ऊर्णातन्तवोपि भौतिकाः। भौतिकादेव भौतिकोत्पत्तिर्न चेतनादिति। पुरुषो मनुष्यः। मनुष्यशरीरे मनुष्य इति व्यवहारः। नह्यात्मनः केशलोम सम्भवति, शरीरादेव। शरीरमपि जडम् केशा लोमान्यपि जडानि। जडादेव जडोत्पत्तिर्नाजडात्। अतो दृष्टान्तविरोधः स्पष्ट एव। अत्र समाधीयते। चेतनं ब्रह्म। जडमजडं सर्वं तच्छरीरम्। शरीरशरीरिणोभेद इति सिद्धान्तः। चेतनमेवाचेतनाच्छरीरादचेतनांस्तन्तून्सृजति गृह्णाति च। पृथिव्यामिति सप्तमी पञ्चम्यर्थिका। पृथिव्या ओषधयः सम्भवन्तीत्यस्य पृथिव्या ओषधीःसंभावयतीत्यर्थः। चेतनमेव कर्तृ। सतः पुरुषादित्यस्य चेतनविशिष्टाच्छरीरात्केशलोमानीति तात्पर्यम्। शरीरशरीर्यभेदस्वीकारमन्तरेण नास्याः श्रुतेः समीचीनोर्थः प्रतिपादयितुं शक्यः शङ्काकवलितश्चेति॥ ८॥

विश्वोत्पत्तिक्रममाह—

तपसा चीयते ब्रह्म ततोन्नमभिजायते। अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्॥ ८॥

जगत्सिसृक्षु ब्रह्म तपसा सङ्कल्पेन चीयते सम्पन्नं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भवति। सङ्कल्पवद्भवतीत्यर्थः। ततस्तदन्तरमन्नमभिजायते। तत्सङ्कल्पादेवान्नं जायत इत्यर्थः। अन्नात् प्राणः। अन्नादेव मनः। अन्नादेव सत्यमात्मा शरीरेवस्थानं लभते। अन्नादेव लोकाः संभवन्ति तिष्ठन्ति वर्धन्ते च। अन्नादेव कर्माणि संभवन्ति। सत्स्वेवं कर्मस्वमृतं मोक्षो भवति। ननु कर्मकारणान्मोक्ष इत्यश्रौतः पन्थाः। ऋते ज्ञानान्न मुक्तिरिति श्रुतिर्ज्ञानादेव मुक्तिं ब्रवीतीतिविरोध इति चेन्न। कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इति वैदिकी श्रुतिमाश्रित्यात्र कर्मणो मोक्षोपपादनं विज्ञेयम्। एतदेव विज्ञापयति सर्वा एवोपनिषदः स्वतन्त्राः। यथेच्छं यत्र तत्र ब्रुवन्तीति ॥ ८ ॥

उक्तार्थं स्पष्टयति—

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥ ९ ॥

यः सर्वज्ञः सर्ववित् सर्वप्रापकः। विद्लृ लाभे। यस्य च ज्ञानमेव तपः। साधनम्। तस्मात्तपःसाधनादेतद्ब्रह्म ब्रह्माण्डं नामरूपमन्नं चकारादन्यत्साधनमपि जायते। अत्रेदमवधेयम्—कस्मिंस्तु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति शौनकस्य प्रश्नः। तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा इत्यनेन धीरकृतज्ञमात्मदर्शनमुक्तम्। ततः परं तेनेदं पूर्णं पुरुषेण सर्वमित्युक्त्वा सर्वमात्मात्मकमित्युक्तम्। एवं चात्मविज्ञानेन तच्छरीरभूतं सर्वं विज्ञातं भवेदिति बहूनां निर्वचनम्। तत्तु न मतिमद्भ्यो रोचते। देहिविज्ञानेन देहविज्ञानस्यासम्भवात्। चेतनज्ञानेन नाचेतनस्य ज्ञानसंभवः। एवमचेतनविज्ञानेन चेतनविज्ञानस्यापि न संभवः। अतोस्मिन् प्रथमे खण्डे नैव दृश्यते तत्प्रश्नस्योत्तरमिति ॥ ९ ॥

इति मुण्डकोपनिषदि प्रथममुण्डके प्रथमः खण्डः

अथ मुण्डकोपनिषदि

प्रथममुण्डके द्वितीयः खण्डः

यज्ञकर्मनिराकरणाय यज्ञकर्मप्रतिपादिकाः श्रुतय उत्थाप्यन्ते—

तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा सन्ततानि। तान्याचरथ नियतं सत्यकामा एष वः पन्थाः सुकृतस्य लोके ॥ १ ॥

ऋग्वेदादीनां मन्त्रेषु कर्माणि यज्ञादीनि यानि कवयो विद्वांसोपश्यन्दृष्टवन्तस्तानि त्रेतायां त्रेतायुगे बहुधा बहुप्रकारैः सन्ततानि। सत्यकामास्तानि नियतं यूयमाचरथानुतिष्ठत। यत एष एव वो युष्माकं लोके सुकृतस्य पन्थाः। यज्ञातिरिक्तः सुकृतमार्गो नास्तीतिभावः ॥ १ ॥

यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने। तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत् ॥ २ ॥

समिद्ध एवाग्नौ प्रतिपादनीया आहुतय इत्युक्तं भवति ॥ २ ॥

यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितं च। अहुतमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान्हिनस्ति ॥ ३ ॥

दर्शपौर्णमासचातुर्मास्येत्यादयो यज्ञाः। यस्याग्निहोत्रे एषामभावः, अतिथीनामभावो वैश्वदेवस्य चाभावः तस्य तदग्निहोत्रं तस्यैव सप्तमाँल्लोकान् हिनस्ति। यज्ञाद्यभावनिन्दैषा ॥२॥

काली कराली चं मनोजवा च सुलोहिता या च सुधूमवर्णा। स्फुलिङ्गिनी विश्वरुची चं देवी लेलायमाना इति सप्त जिह्वाः ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अग्नेः सप्त जिह्वास्ता एताः–काली कराली मनोजवा सुलोहिता सुधूम्रवर्णा स्फुलिङ्गिनी विश्वरुचीति ॥४॥

एतेषु यश्चरते भ्राजमानेषु यथाकालं चाहुतयो ह्याददायन् । तं नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोधिवासः ॥५॥

एतेषु कालीकराल्यादिजिह्वाभेदेषु यथाकालं यो यजमान आहुतीर्ददाति तमेता आहुतयः सूर्यस्य रश्मयो भूत्वा देवेन्द्रस्याधिवासं नयन्ति ॥५॥

एह्येहीति तमाहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहन्ति । प्रियां वाचमभिवदन्त्योर्चयन्त्य एष वः पुण्यः सुकृतो ब्रह्मलोके ॥६॥

एहि एहि आगच्छागच्छ इति ब्रुवाणास्तं यजमानं यज्ञकारिणमाहुतयो देवेन्द्राधिवासं वहन्ति ब्रुवन्ति च ब्रह्मलोके युष्माकं सत्कृत्यमेतदिति ॥६॥

इति कर्मप्रशंसा । अधुना कर्माणि निन्दन्तीयं श्रुतिरुपदिशति–

प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो येभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति ॥७॥

एते यज्ञरूपाः प्लवास्तरणसाधनानि जगत्तरणसाधनानीत्यर्थः । अदृढा निर्बलाः । एते के ? येषु यज्ञेष्वष्टादशोक्तं षोडशर्त्विजः पत्नी यजमानश्चेतेष्टादशसंख्याकान्यज्ञकर्तृनुद्दिश्यावरं न वरं निकृष्टं कर्म प्रतिपादितं भवति । एतदेव यज्ञादिकर्मसम्पादनमेव श्रेयः श्रेयस्करमिति ये जना अभिनन्दन्ति यज्ञमेव कुर्वन्तीतिभावः, ते मूढा अज्ञानिनः सन्ति, अतश्च पुनरेवापि पुनः पुनरित्यर्थः । जरामृत्युं जरां च मृत्युं च यन्ति गच्छन्ति प्राप्नुवन्ति । नहि यज्ञादिकर्मभिर्मोक्षप्राप्तिर्भवतीतिभावः । न हि यज्ञरूपाः प्लवा दृढा विश्वासयोग्याः । न ह्येते विश्वस्य परं पारं तारयितुं समर्थाः ॥७॥

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः । जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥८॥

अविद्यायामन्तरे घोराविद्यायामित्यर्थः । अन्तरशब्दमाहात्म्यादयमर्थो लब्धः । वर्तमाना घोराविद्यावन्त इत्यर्थः । अत एव वयं कर्मिणो धीराः स्वयमात्मानं पण्डितम्मन्यमाना अविद्यायामेव जङ्घन्यमानाः कुत्सितं यथा तथात्यन्तं गच्छन्तः । अन्धेनैव मार्गं नीयमाना अन्धा इव परियन्ति परितो गच्छन्ति ॥८॥

अविद्यायां बहुधा वर्तमाना वयं कृतार्था इत्यभिमन्यन्ति बालाः । यत्कर्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते ॥९॥

अविद्यानेकेषु दुःखमार्गेषु जीवान् प्रक्षिपति । तदेवोच्यते अविद्यायां बहुधा वर्तमाना बाला मूर्खा जडा विवेकशून्या वयं कृतार्था यज्ञकर्मणेति अभिमन्यन्ति अभिमन्यन्ते । कर्मिणो यज्ञादिप्रवर्तका रागादज्ञानाद् यद् यस्मात्तत्त्वं न प्रवेदयन्ति प्रविदन्ति तेनातुरा दुःखनिपीडिताः क्षीणलोका अपगतज्ञानप्रकाशाश्च्यवन्ते सत्यमार्गाद्भ्रष्टा भवन्ति । रागस्यैतन्माहात्म्यम् ॥९॥

इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः । नाकस्य पृष्ठे ते सुकृतेनुभूत्वा इमं लोकं हीनतरं वा विशन्ति ॥१०॥

इष्टापूर्तमिष्टं च पूर्तं च वरिष्ठं सर्वश्रेष्ठं मन्यमाना अत एव प्रमूढा अतिमूढा अन्यच्छ्रेयो ज्ञानसदाचारादिकं न वेदयन्ते न जानन्ति श्रेयसो विमुखास्तिष्ठन्तीत्यर्थः । नाकस्य शारीरिकदुःखाद्युपद्रवरहितस्य लोकविशेषस्य पृष्ठे उपरि सुकृते स्वमतसुकृत्यप्राप्ते तत्फलमनुभूत्वानुभूय पुनरिममेव लोकं देहं हीनतरमस्मादपि हीनं देहं विशन्ति ॥१०॥

तपः श्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः । सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥ ११ ॥

ये विद्वांसो ज्ञानिनोरण्ये निर्जनप्रदेशे शान्ताः सन्तः तपःश्रद्धे तपः श्रद्धां चोपवसन्ति सेवन्ते भैक्ष्यचर्यां च चरन्तस्तिष्ठन्ति ते विरजा अवधूतनिखिलदोषाः सन्तः सूर्यद्वारेणोत्तरायणेन पथा तत्र प्रयान्ति यत्रामृतोमरणधर्माव्ययात्माविनश्यच्छरीरः स पुरुषो परब्रह्माख्यस्तिष्ठति । ब्रह्म प्राप्नुवन्तीत्येव भावः पूर्वया श्रुत्येष्टापूर्तादिकं स्मार्तं कर्म निषिद्धम् । ततः पूर्वं श्रौतं यज्ञादिकं कर्म निषिद्धम् । अत्र च सर्वविप्लवव्यपनयनाय भिक्षया वसन्तस्तप आचरन्तः श्रद्धां चोपासीना जीवन्ति शरीरं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निर्वाहयन्ति ते मुक्ता भवन्तीत्याशयः। प्राचामृषीणां विश्वास आसीदस्ति कश्चन लोको यत्र ब्रह्म निवसति। तत्र गमनमार्गस्तु सूर्यः ॥११॥

परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥१२॥

यज्ञादिकर्मनिन्दामुखेन ब्रह्मप्राप्त्युपायं निर्दिशति—कर्मचितान् कर्मभिः संचिताँल्लोकान्परीक्ष्य परित ईक्षित्वा सर्वथा साकल्येन विचार्य-कर्मचिता लोका अन्ते नश्वरा एव किमर्थं तदवाप्यते श्रमो विधेयो जीवनं च व्यर्थमेव व्ययितव्यमित्यवधार्यं निर्वेदमायात् वैराग्यं प्राप्नुयात्। यानि यज्ञादीनि कर्माणि कृतानि तानि न निःश्रेयसायेति निश्चित्य ब्राह्मणो ब्रह्मविन्निर्वेदं प्राप्नुयात्। स्पष्टतया स्वेष्टं निर्वेदसाधनं निर्दिशति—अकृतो नित्यं ब्रह्म कृतेनानित्येन कर्मणा न अस्ति न प्राप्तं भवतीति। तर्हि किं कर्तव्यं कश्च पन्था अनुशीलनीय इत्याह—तद्विज्ञानार्थं ब्रह्मविज्ञानार्थं स मुमुक्षुर्गुरुं सर्वमायानिवर्तकमाचार्यम् "गुशब्दस्त्वन्धकारार्थो रुशब्दस्तन्निरोधकः। अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते" इतिलक्षणलक्षितमेवाभिगच्छेत्। कीदृशं गुरुम्? श्रोत्रियं वेदादिसच्छास्त्रज्ञानवन्तम्। ब्रह्मनिष्ठं ब्रह्मज्ञं च। एतद्विशेषणद्वयविशिष्टएव गुरुरङ्गीकार्यः। ब्रह्मविदाचार्यो ब्रह्मज्ञानोपदेशार्थः। शिष्यान्न किञ्चिच्छुल्कं गृह्यते इतिविज्ञापनार्थमाह समित्पाणिः समिध आदायेत्यर्थः। समिदादानं च शिष्यस्वीकरणकाले तत्कालीनप्रथाप्राप्तस्य होमादेर्निर्वाहार्थम्। न हि मूर्खोनाचारश्च गुरुरुपासितव्य इत्यादेशः ॥१२॥

तस्मै स विद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥१३॥

अद्यावधि गुरुशिष्ययोग्यतास्वरूपं निरूपितमानुषङ्गिकमन्यदपि विचारितमभिहितं च। इदानीं महाशालं शौनकं स्मरति वदति च—सम्यक्प्रशान्तचित्ताय बाह्येन्द्रियभोगादुपरतायोपसन्नाय विधिपुरस्सरं स्वसन्निधिं प्राप्ताय तस्मै शौनकाय स विद्वानङ्गिरा ऋषिस्तत्त्वतस्तां ब्रह्मविद्यां प्रोवाच ब्रह्मवेदनसमर्थां विद्यामुपदिदेश येन हेतुना साधनेन वा शौनकः सत्यं त्रिकालाबाधितं पुरुषं सर्वशरीरनिवासमक्षरमविनाशि ब्रह्म वेद व्यजानात् ॥ १३ ॥

इति मुण्डकोपनिषदि प्रथमे मुण्डके द्वितीयः खण्डः

अथ मुण्डकोपनिषदि

द्वितीयमुण्डके प्रथमः खण्डः

तदेतत्सत्यम्। यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥ १ ॥

तदेतन्मयोक्तं सत्यं गृहाण। इदं तु न विस्मर्तव्यं "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती"त्येव शौनकस्य प्रश्नः। अस्यैव प्रश्नस्योत्तरं कर्तव्यम्। परविद्ययाक्षरस्याधिगतिरुक्ता। अक्षरस्य स्वरूपमप्युक्तं विस्तरेण प्रथममुण्डके प्रथमखण्डे। तत्र द्वितीयखण्डारम्भे तदेतत्सत्यमित्युक्त्वा मन्त्रेषु कर्माणीत्यादिश्रुतिपाठः। अत्र द्वितीयमुण्डके प्रथमखण्डेप्यादौ तदेतत्सत्यमित्युक्त्वैव यथा सुदीप्तादित्यादिपाठः। प्रथममुण्डके द्वितीयस्मिन्खण्डे तदेतत्सत्यमित्युक्त्वा कर्ममाहात्म्यवर्णनप्रसंगः। अत्र तदेत्सत्यमित्युक्त्वा ब्रह्मस्वरूपनिरूपणप्रसंगः। तदेतत्सत्यमिति स्यान्निरन्वयं वाक्यम्। न हि तस्य योजना कुत्रापि समीचीना प्रतिभाति। मया मन्यते तदेतत्सत्यमितिवाक्यं पूर्णखण्डान्वयि। तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते। तदेतत्सत्यमिति। ब्रह्म-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विद्यया यद्वित्तं तदेतत्सत्यमिति योजना। यथा सुदीप्तादित्यतो द्वितीयमुण्डकस्य प्रथमः खण्डः प्रारभ्यते। यथेति। सुदीप्तात्प्रज्वलितात्पावकाद्यथा सहस्रशः सरूपाः समानरूपा विस्फुलिंगाः प्रभवन्ते प्रभवन्ति तथाक्षरात्पूर्वोक्तस्वरूपाद्विविधा भावाः पदार्थाः हे सोम्य प्रजायन्ते। तत्रैव चापि यन्ति विलीनन्ति। अत्र किञ्चिद्विचार्यते। पावकाद्विस्फुलिंगाः प्रजायन्त इत्यत्र विस्फुलिंगाः पावकं न व्यभिचरन्ति। तस्मादेवोत्पन्नास्तद्धर्मका इति सत्यम्। अक्षरस्य विविधभावानां च तु न समानधर्मत्वं कथं तर्हि यथातथेति पदयोः सामञ्जस्यमिति विचार्यमेव। शरीरशरीरिणोरभेदमाश्रित्यापि न भवति समाधानम्। शरीरिणो निरवयवत्वाच्छरीरस्य च सावयवत्वात्। कथं निरवयवमुपादानं सावयवं जनयेदितिमहान् प्रश्नः। शरीरशरीरिभावव्युत्पादनं चिद्ब्रह्मणोऽचिद्ब्रह्मणो वा न प्रश्नं शमयति। सत्यम्। इत्थमत्र वेदितव्यम्। स्वर्गो ध्वस्त इत्यत्र यथा ध्वंसयोगः स्वर्ग एव ध्यातो भवति न तु विशेष्यभूत आत्मन्यपि। एवं यत्र यत्संभवति तत्रैव तस्यान्वयः। चिदचितौ ब्रह्मणः शरीरभूते। शरीरि ब्रह्म। शरीरिण्यसम्भवन्व्यपदेशः शरीरं गृह्णाति। तथा च विविधा भावा न साक्षाद्ब्रह्मणः प्रजायन्ते किन्तु तच्छरीरभूताया अचित एव। शरीरशरीरिणोरभेदादेवाक्षरात्प्रजायन्त इत्युक्तिः। न वस्तुतोक्षरादेव। अत एव नाक्षरे विकृतिचोदना। एवं च तत्रैवापि यन्तीत्यस्यापि ब्रह्मशरीरभूताचित्येवापियन्ति॥ १॥

दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः॥ २॥

यस्मादक्षराद्विविधा भावाः प्रजायन्ते तदेव विशिनष्टि। दिव्यो दिवि भवो दिव्यः। यद्यपि नास्त्येव ब्रह्मणो भवत्वं तेन नास्त्येव दिवि भवत्वमपि तस्य। परं व्युत्पत्तिमात्रं प्रदर्शितम्। अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यद्धि प्रवृत्तिनिमित्तम्। अमूर्तः सर्वदेहविवर्जितः। पुरुषः सर्वशरीरावस्थितः। स बाह्याभ्यन्तरो बाह्याभ्यन्तरसम्बन्धसहितः। अथवा स इति पृथक्पदं सर्वनाम। बहिर्भवो बाह्यः। अभ्यन्तरे भव आभ्यन्तरः। बाह्यश्चासावाभ्यन्तरश्च। अजो न कदापि जायतेजायत च वा। अप्राणः प्राणनधर्मविरहितः। अमनाः संकल्पविकल्पात्मकं मनो न विद्यते यस्य सः। अत एव शुभ्रः शुद्धस्वरूपः। अत एवाक्षरात् अक्षरः। प्रथमार्थ एवात्र विवक्षितः पञ्चमी तु औपनिषदी। साक्षादपरोक्षाद्ब्रह्मोतिवत्। परतोपि परः। नास्ति किञ्चित्परं तथापि सम्भाव्यमानं यत्किञ्चित्स्यात्ततोपि परः। अथवा परतोन्येभ्यः सर्वपदार्थेभ्यः परः श्रेष्ठः। अक्षरादित्यस्य प्रथमार्थत्वे न विवदितव्यम्। ब्रह्मणः काल्पनिकस्यापि विभागस्यासह्यत्वात्। सर्वशक्तिमतस्तस्य सर्व एव भावा न तत्स्वरूपदोषबिन्दवः यदि जगज्जायते, तस्मादेव नान्यस्मात्। शुद्धस्वरूपादेव न शबलस्वरूपात्। देवो भुङ्क्ते देवः पिबति देवो विचारयति देवो गच्छतीत्यादि प्रयोगा न देवं दूषयन्ति। कथं तर्हि सृजतीति वा विसृजतीति वा रक्षतीतिवेत्यादयः प्रयोगास्तद्दूषणायालं भवेयुः। सर्वथा निष्क्रियस्य ब्रह्माणोस्तित्वे मानमेव किं स्यात्। श्रुतयो मानमिति चेन्न स्याद्येषां मते तासां प्रामाणिकत्वं तेषां मतौ ब्रह्म स्थिरीकर्तुं किं मानं किं वा साधनम्। अतो ब्रह्मास्तीति यद्याग्रह एव तर्हि तस्य सर्वगुणाश्रयतापि सोढव्यैव। यदि तस्यास्तित्वं न भवति भाराय तर्हि तस्य गुणा अपि वराका नीरूपा भाराय नैव भवेयुः॥ २॥

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणि॥ ३॥

एतस्मादेव परतः परादक्षरात्प्राणो जायते मनः सर्वाणीन्द्रियाणि खमाकाशं वायुर्ज्योतिरनल आपो जलं सर्वस्य धारिणी धारणसमर्था पृथिवी चापि जायन्ते। येन द्यौरुग्रा पृथिवीत्यादिवेदमन्त्राणामप्यत्रैवानुकूल्यम्। वेदविरुद्धमुपनिषद्वचनमपि हेयमेव। न चोपनिषदामपौरुषेयत्वेन न तासां वचनं हेयपदवीमारोहयितुं योग्यमितिवाच्यम्। ऋगादिवेदानामपि तथात्वेन कथं तेषां वचनस्य हेयत्वं स्यात्। द्वयोरपौरुषेयत्वपदमधितिष्ठतोर्वेदवचनस्यैव प्रामाण्यं न ब्राह्मणस्य ब्राह्मणभागस्य वा। वेदानुकूलत्व एवान्येषां ग्रन्थानां प्रामाण्यं स्यान्नान्यथा। यथेमां वाचमित्यादिना कण्ठरवेणैव वेदो वदति वेदानां ब्रह्मवाक्त्वमिति। ऋग्भिरेतं युर्जभिरन्तरिक्षं सामभिरित्यादि (प्र० ५।७) वचःसमवायोपि वेदानामेव प्राधान्यं स्थापयति। किं चोपनिषदां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गाथाबाहुल्येन भूतार्थानुवादकत्वेन च न वेदापेक्षयाधिकं प्रामाणिकत्वमनुसन्धेयमिति ॥३॥

अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः। वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥ ४ ॥

एष उपरि वर्णित एव पुरुषः सर्वभूतान्तरात्मा। अग्न्यादीनां तन्निर्मितत्वात्तदङ्गत्वेनात्रोपवर्णनम्। पद्भ्यां पृथिवीत्युक्तिस्तु पद्भ्यां शूद्रोजायतेतिवच्छ्रौतसम्प्रदामनुसृत्य। वाग्विवृताश्च वेदा इत्युक्तिरुपनिषदपेक्षया वेदानां परमहत्त्वमवगमयति ॥ ४ ॥

तस्मादग्निः समिधो यस्य सूर्यः सोमात्पर्जन्य ओषधयः पृथिव्याम्। पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात्प्रसूताः ॥५॥

अत्र नास्ति किञ्चिदौपनिषदम्। शब्दाश्च विवृतार्थाः। योषित्-पुरुष-रेतः-सेचनमन्तरेण नैवोपनिषदृषयस्तूष्यन्तीति स्वभावप्रदर्शनार्था एते शब्दाः ॥ ५ ॥

तस्मादृचः साम यजूंषि दीक्षा यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च। संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः ॥ ६ ॥

ज्ञानसाधनरूपा ऋग्वेदादयो यज्ञादयश्च तस्मादेवोत्पन्नाः।

तस्माच्च देवा बहुधा सम्प्रसूताः साध्या मनुष्याः पशवो वयांसि। प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च ॥ ७ ॥

वयांसि पक्षिणः। प्राणापानाविति पञ्चानां प्राणानामुपलक्षणम्। व्रीहियवावपि सर्वधान्यानामुपलक्षणम्। तपः कष्टसहिष्णुता। श्रद्धा अविचारितरमणीयताप्रतीतिः कुत्रापि। इष्ट साधककर्मसु प्रवर्तिका काचिन्मानसी वृत्तिरिति वा। सत्यं लोकप्रसिद्धम्। ब्रह्मचर्यं जितेन्द्रियता विधिः शास्त्राज्ञानुसरणम्। तपः श्रद्धादयस्तस्मादेवोत्पन्ना इत्यावेदनस्य तदुपदिष्टाद्वेदराशेः प्रसादिता ऋषिभिर्मुनिभश्चेत्यर्थः ॥ ७ ॥

सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्त होमाः। सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त ॥ ८ ॥

अत्र प्राणशब्देनेन्द्रियाणि विवक्षितानि तानि च चक्षुषी श्रोत्रे नासिकारन्ध्रद्वयमास्यं चेति सप्त। तेषु सप्तार्चिषः प्रकाशकानीन्द्रियविषयग्रहणसामर्थ्यानि। सप्त समिधो विषया इन्द्रियद्योतकाः। सप्त जिह्वा भोगसाधनानि। सप्तेमे लोका उच्यन्ते। येष्विन्द्रियेषु प्राणाश्चरन्ति ते सप्त प्राणा गुहाशयास्तत्तदिन्द्रियेषु स्थितास्तत्रैव निहिताश्च। पुनः सप्तग्रहणं पादपूर्त्यर्थम्।

अतः समुद्रा गिरयश्च सर्वे अस्मात्स्यन्दन्ते सिन्धवः सर्वरूपाः। अतश्च सर्वा ओषधयो रसाश्च येनैष भूतैस्तिष्ठतेन्तरात्मा ॥ ९ ॥

येन हेतुना सिन्धुगिर्यादीनामयमन्तरात्मा प्रवर्तकस्तेनैष आत्मा सर्वैर्भूतैः शरीरभूतैः परिवृतः स्वामितया स्वीकृतस्तिष्ठति विकारहितस्तिष्ठति स्वाम्यादितिभावः ॥ ९ ॥

पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्। एतद्यो वेद निहितं गुहायां सोविद्याग्रन्थिं विकिरतीह सोम्य ॥ १० ॥

आचार्य उपदिशति—हे सोम्येदं सर्वं विश्वं पुरुष एव। अङ्गाङ्गिभावेन पुरुषान्न व्यभिचरति। विश्वशब्देन विवक्षितं किञ्चिद्विवृणोति-कर्म तपो ब्रह्म वेद इति। यच्च परामृतं परं च तदमृतं च तदपि पुरुष एव नातो भिन्नं किञ्चिदिति। एतत्सर्वमुपदेशवचनं गुहायां विद्वद्हृदयप्रदेशे निहितमतो दुर्लभदर्शनम्। तच्च यो वेद स इह हे सोम्य अविद्याग्रन्थ विकरति विच्छिन्नं करोतीति ॥ १० ॥

इति मुण्डकोपनिषदि द्वितीये मुण्डके प्रथमः खण्डः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ मुण्डकोपनिषदि

द्वितीयमुण्डके द्वितीयः खण्डः

आविः सन्निहितं गुहाचरं नाम महत्पदम्। अत्रैतत्सर्वमर्पितम्। एजत्प्राणन्निमिषच्च यत्। एतज्जानथ सदसद्वरेण्यं परं विज्ञानाद्यद्वरिष्ठं प्रजानाम्।

पुनरपि ब्रह्मैव स्तौति। आविरित्यव्ययमपरोक्षार्थकम्। यद्यपि ब्रह्म परोक्षं तथाप्युपरिवर्णितरीत्या आविरपरोक्षम्। तत एव संनिहितं सन्निधाने वर्तमानं तिष्ठति। सर्वत्रैव तिष्ठत्यत एव गुहाचरं गुहान्तःकरणं तत्र चरम्। तत्रापि वर्तमानम्। अतिसमीपस्थमिति भावः। किं च महत्पदं महद्भिः प्राप्यस्थानम्। महद्भिर्गम्यं वा। नामेति दाढर्ये। अत्रैव ब्रह्मण्येवैतत्सर्वं जगदर्पितं स्थितमिति भावः। सर्वं जगद्विशिनष्टि यत्किञ्चिदेजति कम्पते गतिविशिष्टमस्तीति यावत्। यच्च प्राणत्प्राणनक्रियां कुर्वदस्ति। यच्च निमिषन्निमेषोन्मेषादिक्रियां कुर्वदस्ति। एतदेतदेव जानथ जानीत कुतः? तदेव सदसद्वरेण्यं सद्भ्योसद्भ्यश्च वरणीयं स्वीकरणीयं स्तुत्यं वा। तच्च प्रजानां मनुष्यज्ञानिनां विज्ञानात्परम्। वरिष्ठं च ॥ १ ॥

पुनस्तदेव विशिनष्टि—

यदर्चिमद्यदणुभ्योणु च यस्मिँल्लोका निहिता लोकिनश्च। तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः तदेतत्सत्यममृतं तद्वेद्धव्यं सोम्य विद्धि ॥ २ ॥

यच्चार्चिमत्प्रकाशवत्। यच्चाणुभ्योपि सूक्ष्मेभ्योपि पदार्थेभ्योणु सूक्ष्म। यस्मिंश्च ब्रह्मणि सर्वे लोका निहिताः स्थापिता इव तिष्ठन्ति। न केवलं लोका लोकिनोपि लोकवासिनोपि निहिता एव दृश्यन्ते। तदेतदक्षरमविनाशि ब्रह्म। प्रथमं प्रतिज्ञातं त्वया वेदनीयं ब्रह्मेतियावत्। स एव प्राणः स एव वाक् स एव मनः। निरतिशयं प्रियवस्तु तदेव। तदेतदेव सत्यमविकारि अमृतं नित्यम्। हे सोम्य तदेव वेद्धव्यं ज्ञातव्यं प्राप्यं विद्धि जानीहि ॥२॥

धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्दधीत। आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥ ३ ॥

तद्भावगतेन तस्मिन्ब्रह्मणि यो भावो भक्तिरनुरागस्तद्गतेन तन्निरतेन चेतसा तदेवाक्षरं ब्रह्म लक्ष्यं विद्धि। व्यध ताडने। साधनं विवृणोति—धनुरायम्याकृष्य। कीदृशं धनुर्महास्त्रमिति। तत्रोपासानिशितमुपासनया निरन्तरध्यानेन निशितं तीक्ष्णं शरं सन्दधीत। लक्ष्यं विशिनष्टि औपनिषदमिति। उपनिषदा नैरन्तर्येण तत्सामीप्येन सेव्यम् ॥३॥

प्रणवो धनुः शरोह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ ४ ॥

प्रणव ओङ्कार एव धनुः। आत्मा मन एव शरः। लक्ष्यं ब्रह्म। अप्रमत्तेन प्रमादराहित्येन तद्वेद्धव्यम्। उपनिषदां स्वातन्त्र्यस्य परमं प्रमाणमेतत्। माण्डूक्ये माण्डूक्यर्षिराह—ओमित्येतदक्षरमिदं सर्वमिति। अत्रोंकारस्य धनुष्ट्वम्। अप्रमत्तेन वेद्धव्यमित्युक्त्या वेध्यवेधकयोः स्पष्ट एव भेदः। शरवत्तन्मयो भवेदिप्यत्यनतिविचारितोक्तिः। न हि शरस्तन्मयो भवति। शरनिक्षेप्तुरेव तन्मयत्वम्। तन्मयो यो भवेत्स लक्ष्याद्भिन्न एव ॥४॥

यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ। अमृतस्यैष सेतुः ॥ ५ ॥

यस्मिन्द्यौः पृथिवी चान्तरिक्षं सर्वैः प्राणैः सह मनश्चोतं तमेवैकमात्मानं जानथ जानीत अन्याश्च वाचो विमुञ्चथ त्यजत। अमृतस्य नित्यस्य ब्रह्मण

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एष सेतुः। अमृतशब्देनात्र ब्रह्मैवोपनिषत्प्रणेत्रा विवक्षितं स्यात्। एवं च तस्य सेतु-प्राप्तिहेतुरेष एव। आत्मज्ञानमेव ब्रह्मप्राप्तिहेतुः। आत्मज्ञानमेव ब्रह्मज्ञानम्। स्वतन्त्रोपनिषत् क्वचिदात्मशब्देन मन आह, क्वचिज्जीवमाह क्वचिच्च ब्रह्माह। शब्ददारिद्र्यविदलनाय तदानीं नासीत्कश्चनोपाय इति मन्तव्यम् ॥५॥

अरा इव रथनाभौ संहता यस्य नाड्यः स एषोन्तश्चरते बहुधा जायमानः। ओमित्येवं ध्यायथात्मानं स्वस्ति वः पाराय तमसः परस्तात् ॥ ६ ॥

रथनाभावरा इव यत्रान्तःप्रदेशे नाड्यः संहताः सङ्गतास्तत्र स एष आत्मा बहुधा बहुभिः प्रकारैर्जायमानश्चरते निवसति। बहुभिः प्रकारैर्जायमान इत्युक्त्यात्मा मन एवेति स्पष्टं प्रतीयते। न ह्यात्मा तत्र बहुभिः प्रकारैर्जायते। बहुप्रकारता जनिश्चोभयमेव तत्रासङ्गतम्। मनसो बहुप्रकारता नासम्भवा। जायमानत्वं च तस्य भावपरिवृत्तित्वम्। तमात्मानमोमित्येवं ध्यायथ चिन्तयत। अत्र ब्रह्मप्रतीतिर्भवत्यात्मशब्देन। तमसोविद्यान्धकारात्पारं गतेभ्यो वो युष्मभ्यं स्वस्त्यस्तु ॥६॥

यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि। दिव्ये ब्रह्मपुरे ह्येष व्योमन्यात्मा प्रतिष्ठितः ॥ ७ ॥

यः सर्वज्ञः सर्वविच्चेति। जानतेर्विदेश्च न कश्चन वास्तविको भेदस्तथापि ज्ञानबोधनयोः कञ्चन स्वकल्पितं भेदमाश्रित्यैवात्रोभयोरुक्तिः। भुवि तन्निर्मितायां पृथिव्यां यस्यात्मन एष महिमा माहात्म्यमेतत्। दिव्येत्याश्चर्यसम्पादके ब्रह्मपुरे जीवशरीरे व्योम्न्यन्तराकाशेन्तःकरण इत्यर्थः। प्रतिष्ठितः ॥७॥

मनोमयः प्राणशरीरनेता प्रतिष्ठितोन्ते हृदयं सन्निधाय। तद्विज्ञानेन परिपश्यन्ति धीरा आनन्द रूपममृतं यद्विभाति ॥ ८ ॥

धीरा धीमन्तः शुद्धान्तःकरणा विज्ञानेन तद्ब्रह्मात्मस्वरूपं वा परिपश्यन्ति सर्वथा जानन्ति। तत्कीदृशम्? यदमृतमतएवानन्दरूपं विभाति ॥ ८ ॥

तद्विज्ञानेन किं फलमित्याह—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ९ ॥

हृदयग्रन्थिः कामक्रोधरागद्वेषादिरूपो भिद्यते। सर्वसंशयाः मरणानन्तरं किं भविष्यति कुत्र गन्तव्यं कृतानां पापानां किं फलं कीदृशं भविष्यतीत्याकारकाश्छिद्यन्ते। अस्यात्मनः कर्माणि ज्ञानेनाज्ञानेन वा कृतानि क्षीयन्ते। कदा? तस्मिन्परावरे परस्मिन्नवरस्मिंश्च दृष्टे सति। ननु किमिदं परस्मिन्नवरस्मिन्निति च? परं प्रलयावस्थावस्थितं रूपम्। अवरं च जगदवस्थावस्थितं रूपम्। अत्रेदमवधेयम्—ब्रह्मदर्शनानन्तरं संचितं क्रियमाणञ्च कर्म नश्यति प्रारब्धं त्वाभोगात्तस्य तिष्ठत्येवेति मतं सर्वथा हेयम्। ब्रह्मविश्वासविरुद्धत्वात्। यदि ब्रह्मज्ञानेन कर्माणि नश्यन्तीति सत्यं प्रतिपादनं तर्हीदं नश्यतीदं च स्थास्यतीतिवचनस्य नावकाशः। ब्रह्मज्ञानमस्य जातमिति प्रत्यायनमेव जन्महानिः। अवशिष्टेपि प्रारब्धे जाते ब्रह्मज्ञाने यदि देहपातस्तत्क्षणं भवेत्तदैव ब्रह्मज्ञानं प्रत्येतव्यम्। अन्यथा ब्रह्मज्ञानं मोक्षसाधनमिति वाग्विजृम्भणमेवेति निश्चप्रचम् ॥८॥

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः।

हिरण्मये प्रकाशस्वरूपे परे सर्वोत्कृष्टे कोशे निखिलजगद्रूपे विरजं रजोगुणरहितं निष्कलं निरवयवं ब्रह्म यदस्ति तच्छुभ्रं निर्मलं ज्योतिषां दिवाकरनिशाकरादीनामपि ज्योतिः प्रकाशकम्। तत् तत्त्वमस्ति यदात्मविदो विदुर्जानन्ति। न हि कश्चन हिरण्मयः कोशो देशान्तरे लोकान्तरे वान्वेष्यः। इदं जगदेव तथाविधः कोशः। अथवा मनो वा बुद्धिर्वा तथाविधकोशत्वेन कल्पनाभूमिमवगाहताम् ॥ १० ॥

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ १० ॥

अत्र तत्रेति द्वितीयार्थे त्रल् औपनिषदः। भातीत्यपि न शुद्धोप्यन्तार्थकः। तद्ब्रह्म सूर्यो न भापयति दीपयति। चन्द्रस्तारकाश्चापि न भापयन्ति। नेमा विद्युतो भापयन्ति। कुतश्चायमग्निर्वराकः काष्ठपरतन्त्रः। ब्रह्मैव सर्वेषां भापयितेत्याह तमेवेति। तमेव तदेव भान्तमनुभाति सर्वं सूर्याचन्द्रमसावित्यादि। तस्यैव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भासा प्रकाशेन सर्वमिदं जगज्जगति च प्रकाशवद्वस्तु-जातं प्रकाशते ॥ ११ ॥

ब्रह्मैवेदमृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षि-क्षणतश्चोत्तरेण। अधश्चोर्ध्वं च प्रस्तृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥ ११ ॥

सर्वास्वेव दिक्षु यत्किञ्चिन्नयनायने विहरति विकसति विलसति च सर्वं तदिदं ब्रह्मैव। इदं विश्वं वरिष्ठं सर्वश्रेष्ठं ब्रह्मैव। अथवा वरिष्ठमिति विश्वस्य विशेषणम्। इदं वरिष्ठमतिकमनीयं विश्वं ब्रह्मैव ॥ ११ ॥

इति मुण्डकोपनिषदि द्वितीये मुण्डके द्वितीयः खण्डः

अथ मुण्डकोपनिषदि

तृतीये मुण्डके प्रथमः खण्डः

ब्रह्मस्वरूपमेव विवृणोति—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्व-जाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि-चाकशीति ॥ १ ॥

द्वा द्वौ सुपर्णा शोभनपतनौ पक्षिणौ स्तः। तौ च सखाया सखायौ समानख्यातिमन्तावात्मेतिना-मानौ। किं च तौ समानं वृक्षं जगद्रूपं परिषस्वजाते आश्रित्य सन्तिष्ठेते। तयोरन्यो जीवात्मा स्वादु मनोहरं पिप्पलं फलं भोग्यपदार्थमिति यावत्। अत्ति भुङ्क्ते। अन्यश्चात्मा परमात्मानश्नन् वृक्षफलमभिचाकशीत्य-भितः प्रकाशते ॥ १ ॥

समाने वृक्षे पुरुषो निमग्नोनीशया शोचति मुह्य-मानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ २ ॥

समाने वृक्षे शरीररूपे वा विश्वरूपे वा स्थितो निमग्नो विश्वोद्भूतदुःखमहार्णवेनीशया साहाय्याभावेन मुह्यमानो वैचित्र्यमनुभवञ्शोचति को मामुद्धरिष्यति कथमहमस्य संसारसिन्धोः पारं गन्तेति विचिन्तयञ्शो-चति परं यदा जुष्टं सर्वैर्योगिभिः कर्मिभिर्भक्तैश्चान्यं स्वस्मादितरमीशं सर्वसामर्थ्यमहेशं पश्यति साक्षात्क-रोति, अस्य परात्परस्य महिमानं च पश्यतीति तदा वीतशोको गतशोको भवति। अन्यस्य माहात्म्यं दृष्ट्वा-न्यस्य प्रसादः कथमिति महाप्रश्नः। अत्र केचित्—अस्य महिमानमित्यस्य स्वस्यैव महिमानमिति व्याख्यन्ति। एवं ते जीवब्रह्मणोरभेदं साधयन्ति। वस्तुतस्तु न तथा व्याख्यानं बुद्धिसंगतम्। जुष्टमिति पदमत्र कल्पवृक्षायते। सर्वैर्ज्ञानिभिर्यतिभिर्भक्तैश्चापि यदा तद्ब्रह्म जुष्टं दृश्यते तदास्य शोकस्यान्तो भवति। भवति च तस्य विश्वासो यद्येते सर्वे तद्ब्रह्म सेवन्ते तदा स्यादेव तस्मिन्किञ्चि-दद्भुतं सामर्थ्यं सर्वेषां शोकविनाशनस्य। ब्रह्मोपासनया कांश्चन वीतशोकादीनपि पश्यति स तस्य माहात्म्यं तदा परिचिनोति वीतशोकश्च भवति। मयापि ब्रह्मोपासनया सर्वदुःखमहोदधिः शोषयितव्य इति। सयुजौ सखायौ समानं वृक्षं परिषस्वजाते, तयोरन्यः, अनश्नन्, इत्येतानि पूर्वमन्त्रे पठतानि पदानि जीवब्रह्मणोः स्पष्टतया पार्थ-क्यं समर्थयन्ते। इह च समाने वृक्षे पुरुष इत्येकवचनं पठ्यते। एवं च "समान" इतिपदं नैरर्थक्यमेव भजते। एक एव पुरुष एकश्चैव वृक्षः। अथवा सेवतां नाम सार्थ-क्यम्। तस्मिन्नेव वृक्षे शरीररूपे तिष्ठतीशोप्यनीशया-मुह्यमानः शोचञ्जीवोपि। शनैः शनैर्ज्ञानेन वा ध्यानेन वा विद्वत्संसर्गेण विनिवृत्तमोहो भवति तदासौ वीत-शोको भवति। मयाप्येतैरिव परेशस्य जोषणेनात्मा संसारसागराद्रक्षितव्य इति सर्वशोकनिवृत्तिर्भवतीति। अथापि जीवब्रह्मणोरत्रैक्यं तु न सिध्यति। वीतशोक-त्वस्य हेतुर्न हि जुष्टस्येशस्य दर्शनम्। जोषणमेव हेतुः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कथं न मयापि तज्जोषणेन सर्वदुःखहानं सर्जनीयमिति विचार्य निश्चित्य च वीतशोको भवतीति वा ॥ २ ॥

यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥ ३ ॥

यदा पश्यो द्रष्टा रुक्मवर्णं प्रकाशस्वरूपं कर्तारं जगत इति शेषः । पुरुषं पुरि शेते तमीशं सर्वैश्वर्यं ब्रह्मयोनिं मूलं कारणं वेदानाम् । ब्रह्म पश्यते साक्षात्करोति तदा स विद्वान् पुण्यपापे विधूय निरञ्जनः सन्परमं साम्यं ब्रह्मण उपैति । पुण्यपापे विधूयेत्यस्य पुण्यमिदं पापं चेदमिति भावं सर्वथा निरस्य पुण्यपापभीतिविरहितो निरञ्जनो भवति परमप्रकाशस्वरूपो भवति । ततश्च परमं साम्यमुपैति । परमसमता तादूप्यम् ॥ ३ ॥

प्राणो ह्येष यः सर्वभूतैर्विभाति विजानन्विद्वान्भवते नातिवादी । आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः ॥ ४ ॥

य एष प्राणो जीवनदाता परमेश्वरः सर्वभूतैराश्रित उपासितो वा विभाति विजानंस्तमुपासीनोतिवादी न भवते सः । ननु किं नामातिवादित्वम् ? उच्यते । अतिक्रम्य वदितुं शीलमस्येत्यतिवादी । किमतिक्रम्य ? तथ्यमतिक्रम्य । यावन्न भवत्यत्र ब्रह्मसाक्षात्कारस्तावद्ब्रह्मणो विषये वैविध्येन वार्तां कुरुते जनः । सा वार्ता तथ्यापि भवत्यतथ्यापि । यावद्याथार्थ्येन कस्यापि ज्ञानं न स्यात्तावत्तस्य विषये यद्वा तद्वा वदनमतिवादितैव भवति । तं विज्ञायातिवादित्वं परिहाय ब्रह्मज्ञः केवलं तथ्यवादी भवति । अथवा ब्रह्म विजानन्नतिवादी बहुवादी न भवति मौनमास्त इत्यर्थः । ब्रह्मसाक्षात्कारानन्तरं स आत्मक्रीड आत्मन्येव क्रीडा रमणं यस्य, आत्मरतिरात्मन्येव रतिर्यस्य, अत एव क्रियावान्सच्चारित्रो भवन्नेव ब्रह्मविदां वरिष्ठो भवति । ननु कथं ब्रह्मवित्स्वपि कश्चिद्वरिष्ठो भवति कश्चिन्निकृष्टो भवति ? ब्रह्मवित्त्वं तु सर्वथा समानं कथं तर्हि तत्रोत्कर्षापकर्षभाव इति चेत् । शृणु । मनो ब्रह्म, अहं ब्रह्म, सर्वं खल्विदं ब्रह्म, निष्क्रियं ब्रह्म, निष्कलं ब्रह्म, चतुर्दशकलं ब्रह्मेत्यादि बहुविधं ब्रह्मज्ञानम् । ब्रह्मस्वरूपं याथार्थ्येन यः परिचिनोति स लोकप्रसिद्धानां ब्रह्मविदां वरिष्ठो भवतीत्यर्थः ॥ ४ ॥

सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् । अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः ॥ ५ ॥

क्षीणदोषा विगताज्ञाना यतयो जितेन्द्रिया यं पश्यन्ति स ह्येष आत्मा सत्येन सदाचारेण तपसा च लभ्यः । सम्यग्ज्ञानेन ब्रह्मचर्येण च नित्यं लभ्यः । अन्तःशरीरे स ज्योतिर्मयः प्रकाशमयः शुभ्रश्च । एवं चाहं ब्रह्मास्मीत्येव ज्ञानं ब्रह्मत्वप्रापकमिति नास्ति मतं सर्वासामुपनिषदाम् ॥ ५ ॥

सत्येन लभ्यः स आत्मेत्युक्तम् । तत्सत्यमेव स्तौति—

सत्यमेव जयति नानृतं सत्येन पन्था विततो देवयानः । येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ॥ ६ ॥

येन यद्वस्तु यथा दृष्टं यथा वानुभूतं तस्य तदेव सत्यम् । तत्र दौरात्म्यं नास्ति । तदेव स्तौति—सत्यमेव जयति नानृतमसत्यं न जयति । सत्येन मनसा यदात्मसाक्षात्कारस्तदा सत्यजयो वेदितव्यः । अनृतं पाषण्डो न जयति । पाषण्डस्य क्षणजीवित्वादचिरजीवित्वाद्वा तस्य सर्वदा पराजय एव । सत्येन सदाचरणनिमित्तेन देवयानो देवा यान्ति येनेति देवयानः पन्था मार्गो विततो विस्तृतः । न स संकीर्णो मार्गः । येन देवमार्गेण विद्वन्मार्गेणाप्तकामा ये काम्याः पदार्थास्ते प्राप्ता यैस्ते ह्याप्तकामा ऋषय आक्राम्यन्ति गच्छन्ति तमेव देवमार्गं तेनुसरन्तीति यावत् । कुत्राक्रमन्तीत्याह—सत्यस्य तत्परमं निधानं सत्स्वरूपं ब्रह्मेति । सत्येनैवाचरणेन तत्परमं सत्यं प्राप्तव्यं भवतीतिभावः ॥६॥

सत्येन यत्प्राप्तव्यं तदेवाह—

बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति । दूरात्सुदूरे तदिहान्तिके च पश्यत्स्वहैव निहितं गुहायाम् ॥ ७ ॥

सत्यस्य परमं निधानं यत्तद्ब्रह्म कीदृशमित्याह—बृहद्व्यापकं दिव्यं दिव्यगुणविशिष्टमचिन्त्यरूपं न चिन्तनीयं चिन्तनानर्हं रूपं यस्य । अलौकिकरूपमितियावत् । सूक्ष्मादपि तत्सूक्ष्मतरं सदपि विभाति विशेषेण भाति सच्चरितानां मनसीति भावः । तद्दूरादपि सुदू-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रैतिदूरे विद्यते तच्चेहान्तिके समीपे च। चोप्यर्थः। तदज्ञानाद्दूरं ज्ञानाच्च समीपस्थमिति यावत्। अज्ञानं दुराचारः पाषण्डं च। ज्ञानं सदाचारः साधुता च। एतदेव चतुर्थेन पादेन विवृणोति पश्यत्सु ज्ञानिषु इहैवास्मिन्नेव शरीरे गुहायामन्तःकरणरूपायां निहितं सर्वद्रष्ट्रपि सर्वादृष्टं तिष्ठति।

सत्येन तपसा स लभ्य इत्युक्तम्। अन्यत्करणं निषेधति—

न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा। ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥ ८ ॥

तद्ब्रह्मतत्त्वं चक्षुषा भौतिकेन नेत्रेण न गृह्यते। वाचापि न गृह्यते न विव्रियते। अन्यैर्देवैरिन्द्रियैरपि न गृह्यते स्वविषयीक्रियते। तपसा कर्मणा यज्ञादिकेनापि वा तन्न ग्राह्यमिति भावः। तद्दर्शनसाधनमाह—ज्ञानप्रसादेन ज्ञानस्य प्रसादः प्रसन्नता विशुद्धतेतिज्ञानप्रसादेन विशुद्धबुद्धया वा विशुद्धसत्त्वो विशुद्धान्तःकरणो यो यदा भवति ततस्तदनन्तरं तं ध्यायमानस्तदेव निष्कलं नीरूपं चिन्तयँस्तत्पश्यति तदनुभवतीत्यर्थः॥८॥

किं च—

एषोणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश। प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन्विशुद्धे विभवत्येष आत्मा ॥ ९ ॥

एषोणुरतिसूक्ष्म आत्मा ब्रह्मरूपश्चेतसा न तु चक्षुषा वेदितव्यः। ननु पूर्वमुक्तं नान्यैर्देवैः स ग्राह्य इति कथमिदानीं चेतसा वेदितव्य इति? उच्यते। नान्यैर्देवैरित्युक्तं तत्र देवा इन्द्रियाण्येव नान्तःकरणम्। इन्द्रियैरेवाविज्ञेयं तन्नत्वन्तःकरणेनापि। अत एव पूर्वं विशुद्धसत्त्व इत्युक्तम्। सत्त्वमन्तःकरणम्। विशुद्धान्तःकरणस्तु तत्पश्यत्येव। तदेव स्पष्टयति श्रुतिः स्वयमेव—यस्मिंश्चेतसि पञ्चधा प्राणः प्राणापानादिभेदेन संविवेश। ननु पञ्चधा प्राणो न केवलमन्तःकरणं प्रविष्टो निखिले हि शरीरे तत्प्रवेशो लोकसिद्धः। सत्यम्। तथापि प्राणानां मुख्यं स्थानमन्तःकरणमिति मत्वेयमुक्तिः। तत्रैव स्थितास्ते नासिकाच्छिद्रादिषु स्वकृत्यं कुर्वाणाः प्रतीयन्ते। तदेवाह-प्राणैः पञ्चभिः प्रजानां सर्वं चित्तमन्तःकरणमोतं व्याप्तम्। चित्तमन्तःकरणमेव। यस्मिन्नन्तःकरणे विशुद्धे सत्येष आत्मा तत्र विभवति प्रकाशतां गच्छति विभुतामेति, अनुभूतो भवतीति वार्थः ॥९॥

यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्। तं तं लोकं जयति तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः ॥ १० ॥

यस्यान्तःकरणे तत्तत्त्वं विभाति स यं यं लोकं मनसा विभाति जानाति सङ्कल्पयतीत्यर्थः। यांश्च कामान्कामयते विशुद्धसत्त्वो विशुद्धान्तःकरणः स तं तं लोकं तांश्च कामाञ्जयति। ब्रह्मज्ञाने जाते सति मनो न किमपि कामयते अतो न किमपि प्राप्तव्यमवशिष्यते। तस्यैवानुवादः शब्दान्तरेणात्र। तस्माद्भूतिकाम ऐश्वर्यकामो मुक्तिरूपैश्वर्यकाम इत्यर्थः। आत्मज्ञमात्मतत्त्वज्ञमर्चयेत्पूजयेत्। तस्य सान्निध्यं प्राप्नुयादित्यर्थस्तज्ज्ञानलाभो लब्धव्य इत्याशयः ॥१०॥

इति मुण्डकोपनिषदि तृतीयमुण्डके प्रथमः खण्डः

अथ मुण्डकोपनिषदि

तृतीये मुण्डके द्वितीयः खण्डः

स वेदैतत्परमं ब्रह्म धाम यत्र विश्वं निहितं भाति शुभ्रम्। उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः ॥ १ ॥

यत्र निहितं स्थितं विश्वं जगद्भाति वर्तते तत्परमं धाम तेजस्तेजःस्वरूपमिति भावः। ब्रह्म स आत्मज्ञोर्चको भूतिकामो वेद। किञ्च ये ह्यकामा ब्रह्मप्राप्ती-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तरकामरहिताः पुरुषा ब्रह्मोपासते ते धीरा बुद्धिमन्त एतच्छुक्रं दुःखदम् । शुच शोके । जगदतिवर्तन्तेतिक्रम्य तिष्ठन्तीतिभावः ॥१॥

कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्र । पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः ॥ २ ॥

यः कामानेव जागत्कान्भोगविलासादीन्मन्यमान आद्रियमाणः कामयते स तैस्तैः कामभिः कामैर्हेतुभिर्जायते । ये यत्कामास्ते तत्प्राप्तिसुलभे देहे जायन्त इत्यर्थः । पर्याप्तकामस्य सर्वथा प्राप्तकामस्य समाप्तकामस्य निरीहस्य वा क्रतात्मनस्तत्त्वदर्शिनस्तु सर्वे लौकिकाः कामा इहैवस्मिन्नेव जन्मनि प्रविलीयन्ति नष्टा भवन्ति ॥२॥

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् ॥ ३ ॥

अवमात्मा ब्रह्म प्रयचनेनाध्ययनेनोपदेशश्रवणेन वा न लभ्यम् । एवं मेधया तीव्रबुद्धया बहुना श्रुतेन शास्त्रादिश्रवणेनापि न लभ्यम् । तर्हि तत्प्राप्तेरुपायः क इत्याह-एष आत्मा ब्रह्मैतद् यमेवोपासकं जनं वा वृणुते तेन लभ्यम् । प्रवचनादिकं तु बाह्येनापि मनसा भवत्येव । एवं च यन्मनसि तत्प्राप्तये परमं प्रेम प्रवर्तते जगच्च यस्मान्निवृतं भवति तेनैव स तल्लभ्यम् । तस्य तस्मा आत्मने आत्मा परं ब्रह्म स्वां तनुं स्वरूपं विवृणुते प्रकाशयति । ब्रह्मानुग्रहेणैव ब्रह्मप्राप्तिर्नान्यथेतिभावः ।

नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गात् । एतैरुपायैर्यतते यस्तु विद्वाँस्तस्यैष आत्मा विशते ब्रह्म धाम ॥ ४ ॥

अयमात्मेदं ब्रम्ह बलहीनेन मनःशौचराहित्येन न लभ्यो लभ्यम् । प्रमादादपि न लभ्यम् । इयं तु सिद्धोक्तिः । तपसोपि न लभ्यम् । तपोपि तत्प्राप्तौ नो हेतुः । कीदृशस्तपसः ? अलिङ्गादशास्त्रीयात् । तर्हि कथं तल्लभ्यते इत्याह-एतैरुपायैर्यस्तु विद्वान्यतते तस्यैष आत्मा धाम तेजस्वि ब्रह्म विशते विशति । कैरुपायैः ? उक्तेभ्यो विरुद्धैरेव । तथा हि—बलमात्मबलम् । अप्रमादः । लिङ्गयते वेदेन बोध्यते तल्लिङ्गम् । न लिङ्गमलिङ्गम् । वेदबोधितं तपः । एवं चैतैरुपायैर्यो विद्वांस्तत्प्राप्तुं यतते तस्यैवात्मा धाम तेजःस्वरूपं ब्रह्म विशतेश्नुते ॥४॥

सम्प्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशान्ताः । ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति ॥ ५ ॥

एनमेनद्ब्रह्म संप्राप्य ज्ञानतृप्ता ब्रह्मज्ञानतृप्ता ब्रह्मसाक्षात्कारतृप्ता इति यावत् । तत एव ते कृतात्मानः कृतार्थाः । ततएव वीतरागास्तत एव प्रशान्तास्ते धीरा ब्रह्मज्ञानेन सर्वगं सर्वव्यापकं सर्वत्रैव स्थितं नतु कंचन लोकविशेषमाश्रितम् । सर्वतः पूर्णतया प्राप्यावगत्य युक्तात्मानः स्ववशीकृतमतयः सन्तः सर्वमेव तदाविशन्ति लीयन्ते ॥५॥

वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले परामृताः परिमुच्यन्ति सर्वे ॥ ६ ॥

वेदान्तविज्ञानसुनिश्चितार्था वेदानां यत्रान्तो यद्बोधने तात्पर्यमिति यावत् । तस्य ब्रह्मणो विज्ञानेन सुनिश्चितार्थाः शोभनतया निश्चित एव नितरां चित एव संज्ञात एवार्थो यैस्ते संन्यासयोगाद्ब्रह्मप्राप्तिविघटकसांसारिकपदार्थानां सन्यासात्त्यागाच्छुद्धसत्त्वाः शुद्धान्तःकरणा ये यतयः सन्ति ते परान्तकाले परो योन्तकालो मृत्युस्तस्मिन्समये ब्रह्मलोके । परामृतात्परामृतभावाद्धेतोः सर्वे परिमुच्यन्ति मुक्ता भवन्ति । अथवा ब्रह्मलोक इत्यस्य ब्रह्मदर्शने जाते सतीत्यर्थः ॥ ६ ॥

गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रति देवतासु । कर्माणि विज्ञानमयश्च आत्मा परेव्यये सर्व एकीभवन्ति ॥ ७ ॥

कलाः षोडशेत्यन्यत्र । ताश्च प्राणश्रद्धाकाशवायुज्योतिरप्पृथिवीन्द्रियमनोन्नवीर्यतपोमन्त्रकर्मलोकनामाख्याः । अत्र नामातिरिक्ताः पञ्चदश कला आख्याताः । मुक्त्यनन्तरं पञ्चदश कलाः प्रतिष्ठाः स्वं स्वं कारणं गता भवन्तीतिशेषः । देवाश्च सर्वे सर्वाण्येवेन्द्रियाणि देवतासु प्रति प्रतिगता भवन्ति । यद्यदिन्द्रियं यत आगतं तत्तत्प्रविष्टमितियावत् । कर्माणि सर्वाण्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्ययावत्कृतानि विज्ञानमय आत्मा च सर्वेप्येते परे परस्मिन्नव्ययेविनाशिनि तत्त्व एकीभवन्ति ब्रह्मसारूप्यं ब्रह्मसायुज्यं वा प्राप्नुवन्ति जन्ममरणराहित्यं गच्छन्तीतिभावः। पूर्वं नासीदैक्यमिदानीमेकतां गता इति विज्ञापनार्थं एव च्विः। एकीभवनशब्देन न जीवब्रह्मणोरभेदः प्रत्याय्यते यथा ब्रह्माजरत्वामरत्वादिधर्मसहचरं तथा जीवा अपि शरीरसहचरितजन्ममरणपरम्परापरिहिता भवन्तीत्याशयः ॥७॥

यथा नद्यः स्यन्दमानाः समुद्रेस्तं गच्छन्तिनामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥ ८ ॥

यथा नद्यः स्यन्दमानाः प्रस्रवन्त्यो नामरूपे विहाय समुद्रेस्तं गच्छन्ति तथा विद्वान् ब्रह्मज्ञः पुरुषो नामरूपे नामरूपादिकं सर्वं विहाय तस्माद्विमुक्तः सन्परादपि परो यो दिव्यो लोकधर्माननुस्यूतः पुरुषस्तमुपैति। तत्सामीप्यं प्राप्नोति। परात्परस्य पुरुषस्योपायनं प्राप्नोतीत्यस्य ब्रह्मधर्मान्प्राप्नोतीत्याशयः। ननु ब्रह्म तु सर्वधर्मविरहितं श्रूयते कथं तर्हि ब्रह्मधर्मप्राप्तिरिति चेत्। शृणु। न हि सर्वधर्मविरहितं किञ्चिद्वस्तु भवितुमर्हति। एवं च हेयधर्मविरहितमेव ब्रह्म न तूपादेयधर्मविरहितमपि। ननु नामरूपे विहायेत्युक्तम्। तत्र प्रश्नः। पूर्वं नामरूपविहानं ततः समुद्रेस्तंगमनमाहोस्वित्पूर्वं समुद्रेस्तं गमनं ततः परं नामरूपविहानमिति। सत्यम् गृहं त्यक्त्वा संन्यस्त इति वदयं लौकिकरीत्या प्रयोगः। वस्तुतस्तु न पूर्वं गृहत्यागः सन्न्यसनानन्तरमेव सः। एवं न नदीनां समुद्रेस्तंगमनात्पूर्वं नामरूपविहानमिति। समुद्रेस्तंगतानामेव तासां नामरूपयोर्हानमिति ॥८॥

प्रशस्तिं करोति—

स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति। नास्याब्रह्मवित्कुले भवति। तरति शोकम्। तरति पाप्मानम्। गुहाग्रन्थिभ्यो विमुक्तोमृतो भवति ॥ ९ ॥

स च यस्तदुपवर्णितं परमं ब्रह्म वेद जानाति ब्रह्मैव स भवति। पुनरस्याब्रह्मवित्कुले न भवति जन्मेतिशेषः। स शोकं सर्वमेव सांसारिकं दुःखं तरति। पाप्मानं चापि तरति। गुहाग्रन्थिभ्योविद्याग्रन्थिभ्यो विमुक्तः सन्नमृतो भवति। शोकतरणं नाम स्वरूपपरिग्रहः। एवं च पूर्वं पाप्मनस्तरणं पश्चाच्छोकतरणमिति। ननु श्रुत्या सर्वत्र जीवब्रह्मणोर्भेद एवाभिहितः कथं तर्हि ब्रह्मविदो ब्रह्मभवनमितिप्रतिपादनं स्यात्साध्विति। उच्यते। यथा दारिद्र्यहानान्न कोपि राजत्वमुपैति। दारिद्र्याद्धीयत इत्येव। एवमेव ब्रह्मवित्तेनं ब्रह्मत्वलाभो भवति ब्रह्मैव भवति। एवं च ब्रह्मैवेत्यपपाठः। जन्ममरणविमुक्तिरेवेवार्थो गम्यः। अत एवान्ते भगवती श्रुतिः स्वयमभिधत्ते गुहाग्रन्थिभ्यो विमुक्तोमृतो भवति। न स पुनर्जन्मादत्त इत्यर्थः ॥९॥

तदेतदृचान्युक्तम्। क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षि श्रद्धयन्तः। तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम् ॥ १० ॥

क्रियावन्तः सदाचारवन्तः श्रोत्रिया वेदज्ञानवन्तो ब्रह्मनिष्ठा ब्रह्मणि निरन्तरध्याना एकर्षि एकमेव ब्रह्म श्रद्धयन्तः स्वयं जुह्वते जुह्वति अनुभवन्ति। जुहोतिरिहानुभवार्थकः। विद्याधिकारिस्वरूपं निरूपयति—यैस्तु विधिवच्छिरोव्रतं मुख्यं व्रतं ब्रह्मप्राप्तिसंकल्परूपं चीर्णं पालितं तेषामेवैतां ब्रह्मविद्यां वदतोपदिशेत। अब्रह्मकामेभ्योन्यमनस्केभ्यो नायं विद्योपदेशः कर्तव्य इति ॥१०॥

तदेतत्सत्यमृषिरङ्गिराः पुरोवाच नैतदचीर्णव्रतोधीते। नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥११॥

तदेतत्सत्यमङ्गिरा ऋषिर्विधिवदुपसन्नाय शौनकाय पुरोवाच। अतो योचीर्णव्रतोस्ति नैतदधीते नैतदधीतामितिभावः। न तदेतमध्यापयेतितात्पर्यम् ॥११॥

इति मुण्डकोपनिषदि तृतीये मुण्डके द्वितीयः खण्डः

काशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन
परमहंस-परिव्राजकाचार्य-स्वामि-श्रीभगवदाचार्येण
निर्मितं मुण्डकोपनिषत्संस्कारभाष्यम्।

●

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri